स्मिन्राशौपीनरश्मिः प्रसूतौसंस्थःप्रोक्तोजन्मराशिःसएव एवंलग्नेनाश्विताःसत्र्यखेटास्तेकिंन
स्युःशालिनांनन्मभानि ११ प्रंसामनोशौकिलराशायःसुःशुभाशुभान्यत्रफलानितेस्युः तत्रस्वरे
खागमनंनानराशौस्पष्टंफलंचाष्टकवर्गजातं १२ स्वान्मदीक्षु ज्ञैनौस्विर्मृतितनैपोलाभार्थेकेंद्रस्थि

ने

तामापन

३०

शूलकोणं तदग्रान्यरेखा तदग्रयोः शृंगयुतं विधेयं मध्ये त्रिशूलस्य च दंडमूलात् सव्येन भान्यर्कभतोभि
जिच्च स्वनामभं यत्र गतं च तत्र प्रकल्पनीयं सदसत्फलं हि ननस्य कूदून्तेन येक्रमेण चिंतावधस्त्र
प्रतिबंधनानि शृंगद्वये तत्क्रमतेब्धभं गः शूलेषु मृत्युं परिकीर्तयंति शेषेषु धिष्ण्येषु जयश्च लाभो
भी० सू० ८ र्थसिद्धिर्विबुधानराणां श्रीसूर्यकालानलचक्रमेतत्प्रदेविवादेव रणे प्रयाणे प्रयत्नपूर्वं ननु चिंत
नीयं पुरातनानां वचनं प्रमाणं अथ चंद्रकालानलचक्रं कर्कोटकेन प्रविधाय वृत्तं तस्मिंश्च पू
र्वापरयाम्यसौम्येषु नाडिहिः संचलिते विधेये रेखे त्रिशूलाग्रतदग्रकेषु कोणाग्ररेखाहितयेन
साध्याः पूर्वत्रिशूले किल मध्यसंस्थं चांद्रं लिखेद्भं तदनुक्रमेण सव्येन धिष्ण्यानि वदंति संतः का
लानलं चक्रमिदं हि चांद्रं रणप्रयाणादिषु जन्मभं चेत् त्रिशूलसंस्थं निधनाय नूनं मतं तदेवं हि संस्थं ह
शुभप्रदं हि इति चंद्रकालानलं अथ गोचरफलं नृजन्मराशेः खचरप्रचारैर्यैर्हि गोचरे संहिते।
कैः प्रणीतं स्फुटफलं तत् किल संप्रवच्मि बालावबोधप्रदमग्रभानाम् गौतिभयश्रीर्व्यसनं च दैं
न्यं शत्रुतद्भयो यानमनीवपीडा कांतितपोभीर्विविधिं च सिद्धिर्लब्धिर्व्ययोर्कस्य फलं क्रमेण ॥ १ ॥ स्थ
दन्नमर्थं तदयमे धनलाभं कुर्यात् चतुर्थाकार्यविघातमेवं वित्ते [illegible] राजभयं सुरखं चलोभं च षष्ठोर्कं कुरु

चंद्रकालानलचक्रम्
बंधन
वध
उद्वेग
जय
हस्त
पाद

तोभद्रचक्रम्॥ अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपनं॥ विख्यातं सर्वतोभद्रं सद्यः प्रत्ययका
रकम्॥ १॥ यामयोत्तराः प्राग्पराग्रकोष्ठानवान्यचक्रे सुधियाविधेयाः॥ स्वरर्क्षवर्णादिकमत्र
लेख्यं प्रसिद्धभावान्नमयानिरुक्तम्॥ २॥ अमोक्ष्टके तुरे हानिः स्वरे व्याधिर्भयं तिथौ॥ राशि
विघ्ने महाविघ्नं पंच विद्धेन जीवति॥ ३॥ भरण्यकारो वृषभं च नंदां भद्रं च कारं श्रवणं विशा
खां॥ तुलां च विध्येदनलर्क्षसंस्थो गुरोस्त्र चक्रं गदितं स्वरज्ञैः॥ ४॥ बकारमोकारफकारदासेत्यातीं
रकारमिथुनं च कन्यां॥ तथाभिजित्संज्ञकभं च विध्येद्मूलर्क्षसंस्थो हि नभस्वरेंदुः॥ कर्ककं कारं च ह
रिं पकारं चित्रां च पौसं च तथा कर्कं॥ अकारकं वैश्रभमं च विध्येदुल्लेन भौमं ऽल्लगोमृगास्यः॥
र्द्धं विवेधः सर्वतोभद्रचक्रे सर्वेदेम्याश्चिंतनीयस्सुधीभिः॥ दद्याद्धेधः स फलं सौम्यजातो त्वं
तं कष्टानुरूपवेधः करोति॥ अथ सूर्यकालानलचक्रम्॥ सूर्यकालानलं चक्रं स्वरशा
स्त्रोदितं प्रियतन्। नरदृहं विशदं वक्ष्ये च मत्कृति कं परं॥ १॥ त्रिशूलकाग्राः सरला श्रुतिस्थः
कितो र्द्धरेखाः परिलेखनीयाः रेखात्रयं मध्यगतं च नत्र दे दे च कोणेषु परिगो विधेयं॥ त्रि

॥ओम.जा.भ.
२५

लाकुलितो वक्रदानदः जलजिनीशसुते नलयान्विते न पकृतोपकृतो हि नरो भवेत् ७ विधुजनाशनपाल
मयान्वितो धनविनाशन वैरिगदार्दितः विकलिताकलितो लिसमान्विते रविसुते विसुते सुखवोनरः ८ रविसु
ते नभुते सति कार्मुके सुतगुणैः परिपूर्णमनोरथः अचिरतः कीर्तिमुदां पतेर्नरो विभवतो भवतो बहुतो भवे
त् ९ नरपतेरतिगौरवता ऽन्ते द्विजसुते मृगयाखिगतेनरः अगुरुता कुसुमैर्मृगजान्तयाविमलयामल
याचलयेः सुखं १० नतजितो रिपुभिर्व्यसनान्तरैर्विहितकर्मपराङ्मुखतान्वितः रविसुते कलशेन सम
न्विते सुसहितः सहितः प्रचयेन्नरः ११ विनयताव्यवहारसुशीलता सकललोकगुरुत्वगुणेन रः उपकृ
तो निपुण क्षितिमिहन्त्रिते रविभवे विभवेन समन्वितः १२ बलान्वितेऽपि शनी चराशौ खेटे भवाराशि
फलं समग्रं नीचोच्चगेहास्तमयादिभावैर्न्यूनाधिकत्वं परिकल्पनीयम् १३ इति शनिफलानि ७
अथ पापानिचक्रं जन्मर्क्षतो यच्च बकुत्रसंस्थं मित्रस्य पुत्रं प्रथमं विदित्वा चक्रे नराख्ये खनुसन्धि
स्यादिन्यस्य भान्प्रवदेत्फलानि १ नवत्रमेकं वदिनो विभागे मुखे लिखेद्दीणियुगं च कण्ठे नेत्रे च
नस्त्र युगं हृदि स्थमेकं चक्रं वामकरेवनस्क २ वामे च पादे त्रितयं च भोनाभानां त्रयं दक्षिणपादसं
स्थं चत्वारि ऋक्षाणि च दक्षिणाख्यपाणौ प्रणीते मुनिनारदेन ३ रोगो लाभो हानिराप्तिः सौख्यं वधः
पीडा मनुष्याणां चलाभः मदेवकेमागोगे कल्पनीयं तदेतोमयाद्वीप्येऽमानस्फलानि ४ अथ सर्व

55

३५

विरतिं विरतो नृणाम् ८ कलहघातमतिं जननिंद्यतां प्रयुननामयतं नियतं नृणां व्यसनतां तनुते लिसमा-
श्रितः कविरलं विरलं कुरुते धनं ९ अभिरतिः सुरसंगनया नृणां व्ययभयं कृशतामतिचिंतया भृगुसु-
ते मृगराशिगते सदा कविजने विजने पि मनो भवेत् १० उशनसः कलशे जनुषि स्थिते वसनभूषण-
भोगविहीनतां विमलकर्ममहालसतां नृणां उपगता पि गता पि रमा भवेत् ११ भृगुसुते सति मीनं
समन्विते नरपते र्विभुता विततां भवेत् रिपुसमाक्रमणं दुविलागमो वितरणे न रणे प्रणयो नृणां
१२ इति भृगुः धनविहीनतया न्वतातनो जनविरोधितये स्थितनोशनं क्रियगते कुसुते खजने नृणां
विषमता शमता शमनं भवेत् १ युवतिसौख्यविनाशनतां भृशं पिशुनसंगरुचिं मतिविच्युतिं धन-
नृपांजनने वृषमस्थिते रविसुतो वितनोत्स्वमादिशन् २ प्रचलनं विमतं न च विहीनतां भवनवां-
सविलासकुतूहलं व्रजति नामिथुनोपगते सुते दिनविभोर्न विभो लभते सुखं ३ कुलिनिकेतन-
गामिनि भानुजे ततनुभृतां कृशतां भृशमुन्नया वरविलासकराकमलो भवेद् विकलं विकलं स्थिम-
उत्तं ४ लिपिकलाकुशलत्वकलिप्रियाविमलशीलविहीनतनुर्नरः रविसुते रविवेश्मनि संस्थिते
हततनेयस्तनयप्रमदार्तिभाक् ५ विहितकर्मगणे समे कदापि नो विनयतो रतिस्थसोहृदयं रविसुते
सतिकन्यकयाचिते विवलितावलिता सहिता भवेत् ६ निजकुलेन निपालनलालितः स्मरव

जा०जा०भं० चिरमरणानि च ९ हतमतिः परकर्म करोति नरः स्मरविहीनतरो भयरोगभाक् सुरगुरौ मकरे विदधाति नो जननमं
३४ नो रमे नो रयसाधनं १० गदयुतः कुमतिर्द्रविणोज्झितः कृपणतानिरतः कृतकिल्बिषः घटगते सति दे
वपुरोहिते कदशनो दशनोदरपीडितः ११ नृपकृपाप्तधनो मदनोन्नतिः सदनसाधनदानपरो नरः
सुरगुरौ तिमिनामसहिते सता मनुमतो नुमतो नु मतोत्सवदो भवेत् १२ इति गुरुः भवनवाहनहृद्युतराधिपः प्रचल
नप्रियता विहितादरः यदि वसुः जननेहि भवेद्द्विः कविघृतो विघृतो रिपुभिर्नरः १ वरकलत्रसुतोत्सव
गौरवः कुसुमगन्धरुचिः कृषिनिर्मितिः वृषगतोऽसुरजे कमला भवेद्विरलाविरलारिपुमंडली २ मृगमु
ते जनने मिथुनस्थिते सकलशास्त्रकलामलकौशलं सरलता ललिता किल भारती सुमधुरा मधुरान्नरु
चिर्भवेत् ३ द्विजपतेः सदने भृगुनंदने विमलकर्मगतिर्गुणसंयुतः जनमले सकलं कुरुते वशं सुक
पि लयाकलयो गिरा नरः ४ हरिगते सुरवैरिपुरोहिते प्रभवति नो धनमानसुखानि च निजजनव्यसना
न्यपि मानवस्त्वहितं तोहितं नोपमनव्रजेत् ५ मृगसुते सति कन्यकयान्विते लघुधनः खलतीघृमनो
रथः कमलया पुरुषोऽतिविभूषितस्त्वमितयामितयापि गिरान्वितः ६ कुसुमवस्त्रविचित्रधनान्वितो
वहुगमागमनोनतमानवः जननकान्तलाकलनेपद्मसुकविना कविनायकता व्रजेत् ७ यु
वतिसूनुधनागमनोत्सवं सचिवतां नियतं शुभशीलतां जनयति कामेक गः कुरुते कविः कविरतिं

57

रकर्मकृत् मकरगोस्त निशीतकरात्मजेस्मिन्नतः सुनतः प्रभवो भवेत् १० गृहकलिं कलशेशशिनं दने वितनुते
तनुतां नतदीनतां धनपराक्रमधर्मविहीनतां विमतितामतितापितशत्रुभिः ११ परधनादिकरः कुलनंदनो
द्विजसुरानुचरो हि नरो भवेत् शशिसुते प्रसरे न समाश्रिते सुवदनां वदनात्ति विहोकनः १२ इति बुधः व
कृत रकुरुते समदारतां सुचरितानि च वैरिसमुन्नतिं विभवतां च मरुत्पतिपूजितः क्रियगतोपगतोस्म
ति प्रदः १ द्विजसुरार्चनभक्तिविभूतयो द्रविणवाहनगौरवलब्धयः सुरगुरौ वृषभे वृहवे रिणसुरा गा
रणागाढपराक्रमैः २ कविनयान्वहितः प्रियवाक्शुचिविमलधीलसर्वनिपुणः पुमान् मिथुनगे सुनिद
वपुरोहितेसुहितताचिंतता सहितो भवेत् ३ वहुधनागमनोमदनोन्नतिं विविधशास्त्रकलाकुशलो नरः प्रि
यवचास्त्र कुलीरगतेगुरौ चतुरगो सुरगेः करिभिर्युतः ४ अचलदुर्गवनभ्रमनोज्झितो द्रुतं नत नेनुदानपरो
भवेत् अरिविभूतिहरो हि नरो युतः सुवचसा वचसामधिपे गुरौ ५ कुसुमगंधलदानरशालितां विमल
ताधनदानमतिं भृशं सुरगुरौ सुतयात तिसंयुते रुचिरताचिरतापितशत्रुता ६ श्रुतितपोजपहोममहो
त्सव द्विजसुरार्चनदानमतिर्भवेत् वणिजि जन्मनि चित्रशिखंडिजे च नरता तुरतामहितारिता ७ धनवि
नाशनदोषसमुद्भवैः कृशतरो वहुदंभपरो नरः अलिगते सति देवपुरोहिते भवनतोवनतोपि च दुःखभा
क् ८ विनरलप्रलयो वहुवै भवनं तं धनान्यपि वाहनसंचयः धनुषि देवगुरौ हि मतिर्भवेत्सुरुचिरारू

च

सावित्री जगतां माता सावित्री जगतः पिता मया दत्ता च सावित्री ब्राह्मणाय प्रतिगृह्यतां अवैधव्यं च
मे नित्यं यावज्जन्मनि जन्मनि मृता च वसते लोके ब्रह्मणा पतिना सह तत्रैव चिरंकालं भुंक्ते भो
गानुत्तमान् मुने नैव विधानेन कर्त्तव्यं व्रतमुत्तमं सर्वे मनोरथाः प्राप्यन्ते रुद्रोपजायते
इति स्कांदे सावित्रीव्रतं अथाह साध्ये हेमाद्रौ स्कांदे धर्मराजवरदानानंतरं सावित्र्युवाच या
मदीयं व्रतं देव भक्त्या नां करिष्यति भर्तृ सा सहिता साध्वी सम[illegible] सुखभागिनी धर्मराज उ
वाच नारी वा विधवा वापि अपुत्रा पतिवर्जिता सभर्तृका सपुत्रा वा कार्यं व्रतमिदं शुभं ज्येष्ठमा
से तु संप्राप्ते पौर्णमास्यां पतिव्रता स्नात्वा चैव शुचिर्भूत्वा वटं सिंचेद्वहूदकैः सूत्रेण वेष्टयेत् तत्र गं
धपुष्पाक्षतैः शुभैः नमो वैवस्वतायेति भ्रामयेत् प्रदक्षिणा [illegible] नक्तं चैव [illegible] मेकं समाहि
ता तथैव वटवृक्षं च पक्षे पक्षे प्रपूजयेत् संप्राप्ते तु पुनर्ज्येष्ठे लघु कृष्णादर्शी नयेत् एतानाधाव
ने कृत्वा नियमं कारयेत्ततः त्रिरात्रं लंघयित्वा च चतुर्थे दिवसे त्वहं चंद्रायार्घ्यं प्रदत्त्वा च पूजयित्वा शुभा
सती मिष्टान्नानि यथाशक्त्या भोजयित्वा द्विजोत्तमान् भोक्ताहं तु जगद्धात्रि निर्विघ्नं कुरु मे शुभे निय
सर्वान् मनोरथान् प्राप्य ब्रह्मलोके महीयते इति स्कांदे सावित्रीव्रतम् अथोद्यापनम् ४२

पृ० ३०६

59

पाम ३०६

हरिद्रारंजितेश्चैव कंठसूत्रैः समर्चयेत् सखीनां कंठसूत्राणि तद्दिने प्रतिपादयेत् पक्वान्नानि च देयानि तानि सम्यक् द्विजोत्तम माहात्म्यं चैव सावित्र्याः श्रोतव्यं मुनिसत्तम पुराणश्रवणं कार्यं सतीनां चरितविभा पूजयेत्प्रीत्यमेव हमंत्रेणानेन सुव्रत सावित्री च प्रसावित्री स तते ब्रह्मणः प्रिया पूज्य सेहृयसे देव द्विजैर्मुनिगणैः सदा त्रिसंध्य देवि भक्तानां वदिता त्वं जगन्मये मया दत्तां च पूजेयं प्रतिगृह्ण नमोस्तु ते नमः सावित्र्यै पादौ तु शतिपूर्वीक पूजने सावित्री च प्रसावित्री [illegible] ह्व धाम तासि शोभने जगत्त्रयोस्थिता देवि त्रिसंध्या च तपा नघे चिते देवि त्रिलोके च मेता गोतं महेश्वरि व्यापितं सकलं लोकं यतो मां पाहि सर्वदा रूपं देहि सौभाग्यं देहि मे शुभे पुत्रान्देहि धनं देहि सर्वं जन्मसु सर्वदा यथा तेन वियोगस्तु भर्त्रा सह सुरेश्वरि तथा मे स्तु महाभागे कुरु त्वं जन्मजन्मनि एवं संपूज्य ये देवं कमलासनसंस्थितं एवं दिन त्रयं नीत्वा चतुर्थे हनि सत्तम मिथुनानि च संभोज्य षोडशे वद्विजोत्तम पूजये द्वस्त्रदानेश्च भूषणैश्च द्विजोत्तम अर्चयित्वा तथाचार्यं सपत्नीकं सुसंमतं तस्मै संकल्पितं सर्वं हेमसावित्रि संयुतं मंत्रेणानेन दातव्यं द्विजमुख्याय सुव्रत सावित्री कल्पविड् येद्वाणीपत्यतपाठने

यथोदे
हि.४

कै

ननु तत्तु स्विवीषया निंदेति किमित्याख्यायते अध्ययनविधेर्मोक्षादर्वाक् पर्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभासत्वा
ननु तत्तु स्विचीषया निंदेति किमिति व्याख्यायते अध्ययनविधेर्मोक्षादर्वाक् पर्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभासत्वा
त्तयोर्ज्ञानकर्मणोरिति न फलशब्दो मोक्षे रूढो मोक्षमपि समीहितेनेक
वा हार्यैव निंदा किं नेष्यते तत्राह

ल

तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिंदा समुच्चिचीषया न निंदापरैवैकैकस्य पृथक् फलश्रवणा
त्तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिंदा समुच्चिचीषया न निंदापरैवैकैकस्य पृथक्फलश्रवणा
द्विद्ययान दारोहंति विद्यया देवलोकः न तत्र दक्षिणा यांति कर्मणा पितृलोक इति नहि शास्त्रविहि
तं किंचित्कर्मकस्यचिदकर्तव्यतामियात् अंधं अदर्शनात्मकं तमः प्रविशंति ये केऽविद्यां विद्याया
अन्यामविद्यां कर्मेत्यर्थः कर्मणो विद्याविरोधाभावात् तामविद्यामग्निहोत्रादिलक्षणामेव केवला
मुपासते तत्पराः संतोऽनुतिष्ठंतीत्यभिप्रायः ततस्तस्मादंधात्मकात्तमसो भूय इव बहुतरमिव तेन त

अंधं तमः प्रविशंति येऽविद्यामुपासते ततो भूय इव ते तमो य उ विद्यायां रताः ९॥

अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

मः प्रविशंति के कर्म हित्वा ये उ ये तु विद्यामेव देवताज्ञाने रताः अभिरताः नन्वावांतरफलभेदं
विद्याकर्मणोः समुच्चयकारणमाह अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदंति अन्यदाहुरविद्यया कर्मणा
त्यर्थः अन्यदेवेत्यादि अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदंति अन्यदाहुरविद्यया कर्मणा
क्रियते तथा चोक्तं कर्मणा पितृलोकः विद्यया देवलोक इति श्रुतेः एवं शुश्रुम श्रुतवंतो वयं धीराणां
धीमतां वचनं ये आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवंतस्तेषामयमागमः पारंपर्यागत

लव्यवहारदर्शनात्ततो यो देवलोकादिमुपादित्सते तस्य तदपि फलं भवत्येवेत्यर्थः ॥१०॥ ॥ = श्रीरामायनमः ॥ हरे

ओ

या

61

ने

ओम्
ईशो०
उ० ३०
१०

अत एवमतः विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः यस्तद्वेदोभयं सह एकेन पुरुषेणानुष्ठेयं वेद तस्यैवं समुच्चयका
रिण एकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते अविद्यया कर्मणा अग्निहोत्रादिना मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्यु
शब्दवाच्यमुभयं तीर्त्वातिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति तद्ध्यमृतमुच्यते यद्देवतात्मभा
वगमनम् ॥११॥ अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते अन्धं तमः प्रविशन्ति येऽसंभूतिं सम्भवनं सम्भूतिः
सा यस्य कार्यस्य सा सम्भूतिः तस्या अन्याऽसम्भूतिः प्रकृतिः कारणमविद्याख्या अव्याकृताख्या तामसम्भूतिमव्याकृताख्यां प्रक

विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥११॥=
अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते। ततो भूय इव ते तमो य उ सम्भूत्यां रताः ॥१२॥
अन्यदाहुः सम्भवादन्यदाहुरसम्भवात् इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥=१३=

तिं कारणमविद्याकामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति ततस्त
स्मादपि भूय इव बहुतरमिव तमः प्रविशन्ति ये तु सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः अधुनोभयोरुपासनयोः
समुच्चयकारणमवयवफलभेदमाह अन्यदेव पृथगेवाहुः फलं सम्भवात्सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यै
श्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः तथा चान्यदाहुरसम्भवादसम्भूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तमन्ध
तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्विचचक्षिरे व्या
कृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥=

ॐ नि०सिं०
३४

वेणगोत्रप्रवरनिर्णयः तौचमिथोनिषेधेनिमित्तं सगोत्रायभिन्नं दुहितरंनप्रयच्छेदित्यापस्तंबोक्तेः अ
समानप्रवरैर्विवाहइति गौतमोक्तेश्च तत्रगोत्रलक्षणमाह प्रवरमंजर्यांबौधायनः विश्वामित्रो
जमदग्निर्भरद्वाजोथगौतमः अत्रिर्वसिष्ठःकश्यपइत्येतेसप्तर्षयः सप्तानामृषीणामगस्त्याष्टमानां
यदपत्यंतद्गोत्रमिति यद्यपिकेवलभार्गवेष्वार्ष्टिषेणादिषुकेवलांगिरसेषुचहरितादिषुनैतत्तु भृगव
ंगिरसोरुक्तेष्वनंतर्गतेः तथाप्यत्रेशूपतिरे वेतिकेचित् अतएवस्मृत्यर्थसारे प्रवरैक्याद्वैवात्रो
विवाहउक्तः यद्यपिवसिष्ठादीनांनगोत्रत्वंयुक्तं ।। अतएवपूर्वेषांपरेषांचैतद्भेदे अत्रविशेषोस्मा
त्कृतेप्रवरदर्पणेज्ञेयः प्रवरास्तुप्रवराणिप्रवराः कल्पकाराहिप्रासिष्टेतिहोतावसिष्ठवदित्य
ध्वर्युरित्यादीनामेषांवरणमामनंति तत्प्रवरणे यद्यपिगोत्रभूतस्यापिकश्चिदृत्रपतेतथा
पिपूर्ववद्द्विभेदोद्रष्टव्यः अन्यथातेषांआर्षेयएकार्षेयइत्यादिनिर्देशानुपपत्तेः अन्येतुत
द्गोत्राणांआर्षेतोतावत्समाइतिभेदमाहुरितिदिक् अत्रविशेषमाहबौधायनः एकएवऋषि
र्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वमन्यत्रभृग्वंगिरसांगणादिति स्मृत्यर्थसारः त्रिप
माणतयावापिसत्तयावानुवर्ततेतं एकस्यहृत्रयपतेयत्रतत्ज्ञोत्रंतस्पकथ्यते भृग्वंगिरोगणेषु
तुमाधवीयेस्मृत्यंतरे पंचानांत्रिषुसामान्याद्विवाहस्त्रिषुद्वयोः भृग्वंगिरोगणेष्वेवंशेषा

63

नोकंन्यानामियंसंख्या उद्वोढुः पितरौ पितृव्य पितरौ तज्जन्मकूटस्थ पत्नीद्वंद्वं तस्य चतुष्कमष्टचततो
प्यस्य क्रमात्षोडशार्णवं त्रारंभकद्वंद्वयंतिप्रमितिरित्यासप्तकस्तरदा एकैकान्वयकन्यकाः पितृ
कुलेत्वासप्तकद्वंद्वं ध्रुवे यद्यप्येकस्य वहवः सुताः सुस्तदपीहतु संबंधसाम्याद्वैकैव गणितेत्य
वधार्यतां एकस्मान्मिथुनात्सुतौ पुत्र दुहितारौ द्वंद्वद्वयं तद्भूपात्तस्माद्द्वंद्वचतुष्कमष्टचततो ततः षो
डशार्णोरदाः यावत्सप्तमकद्वंद्वमथिनिरूतं तवः कंन्याद्र है कान्वये नादंतैर्गणितारसैकरक
द्रत्रोवंत्रो सपिंडां मितृः मातृर्जन्मद्वंद्वं पत्नी च मिथुनं द्वंद्वं तयोः सागरास्तस्याः पंचमकद्व
मष्टमितिरित्येकान्वयः पुंसुते द्वंद्वात् द्वंद्वयुगं ततो द्वयं यद्गतो ष्टो पंचकद्वंद्वं द्वारदो एषः सप्त
गुणाःत्राराभ्रविधवो मातुः सपिंडाकुले कुलद्वयस्य कन्यकायुताभिधाः सपिंडकाः शिताङ्गु ६
कूधराद्द्रत्रो विवाहे कस्य वर्जिता इति एतच्च सर्ववर्णसाधारणं सर्वत्र सापिंड्य संज्ञावादिति
विज्ञानेश्वरोक्तेः पंचमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात् सपिंडता निवर्त्तेत सर्ववर्णेष्व
यं विधिरिति हरनौपरेध न देवलवचनाच्च संबंधतत्त्वे सुमंतुः पितृष्वसृसुतां मातुलसुतां
मातृसगोत्रां समानार्षेयीं विवाह्य चांद्रायणं चरेत् परित्यज्य एनां मातृवद्बिभृयादिति दिक् कं
धेरिदमार्षप्रवरः गोत्रं प्रसिद्धं समाने आर्षे गोत्रे च यस्य तस्मात् ज्ञाता यान भवति तां अपसंदे

यमर्द्धने यांकलिनीरितिपुष्पं वनस्पतिरसोधूप इतिधूपम् साज्यंत्रिवर्त्तिइतिदीपं अ
न्नंचतुर्विधमितिनैवेद्यं पूगीफलं महद्दिव्यमितितांबूलं इदंफलमितिफलम् हिरण्य
गर्भेतिदक्षिणा उद्बुध्यस्वमितिमंत्रेणपुष्पं ततोर्घ्यं उर्वश्याश्चपतियंत्सय:पुरूरवस:
पिता योग्रहाणामधिपतिर्बुधोन:सप्रसीदतु यानिकानिचेतिदक्षिणा नमस्कारप्रार्थनात प्र

तोवापनदानम् संतुष्टोवायनाद्यस्मादिलानाथोग्रहेश्वर: वरांश्चविलुदत्तान्समकलान्त:
प्रयच्छतुइतिपूजा अथकथा सूतउवाच बुधाष्टमीव्रतेभूयवस्याभिधरणपांडव येन
चीर्णेननरकंनर:पश्यतिनकश्चित् पुराकृतयुगस्यादौइलो राजावभूवह वडूभत्स्य
सहस्त्रैर्मंत्रिभि:परिवारित: जगामहिमवत्पार्श्वे महादेवनपालितम् योस्याप्रविश
तेपुमोसास्त्रीभवतिनिश्चितम् सराजामृगयासक्त:प्रविष्टस्तदुमावनम् एकाकी
हयमारूढंस्तणास्त्रीत्वंजगामह सावभ्रामवनेसुन्दरीपीनोन्नतपयोधरा काहंकस्य

65

व्र.कं. १२.

कुतः प्राप्ताबुध्यते नैव किंचन तो ऽदर्शद्बुधस्तन्वीं रूपोदार्यगुणान्विताम् अष्टम्यां बुधवारे
णातस्यास्तुष्टो बुधो ग्रहः इंदोर्गृहाश्रमे रम्यं चालीयं रूपतोषितः पुत्रमुत्पादयामास यो ऽसौ
ख्यातः पुरूरवाः चंद्रवंशकरो राजा प्राप यः सर्वमहीभृतां ततः प्रभृति कृष्णपक्षे ऽष्टमी बु
धसंयुता सर्वपापप्रशमनी सर्वोपद्रवनाशिनी अथान्यदपि ते वच्मि धर्म्मराजकथान
कम् आसीद्राजा विदेहायां निमिर्नाम स वैरिभिः संग्रामे निहतो राजा तस्य भार्या ति[illegible]ता दुःखित
ऊर्मिला नाम वश्याम महीं वालकसंयुता अवंतिविषये प्राप्य ब्राह्मणस्य निकेतने च
कारोदरपू[illegible]र्थं निसंकंडनपेषणं हृत्वा सा सगोधूमान् इदौ वालकयोस्तयोः का
रुण्यात्सुत्रवात्सल्यात्स्वयासंपोष्यमानयोः कालेन बहुना साध्वी पंचत्वमगमत्तदा
पुत्रं तस्या विदेहायो गत्वा स्वपितृराज्ये उपविष्टः सत्स्य योगाद्भुजे ग्रामं नाकुलं अन्वि
ष्य धर्मराजेन सा केन्यानिमिवंशजा [illegible]मला नाम चार्वंगी सर्वलक्षणसंयुता तामुवाच १२.

तु श्यामा

वरारोहे धर्मराजः स्वकाप्रियो वहस्व सर्वव्यापारं स्थामलेलेंगृहे मम कुरुष्व सर्वं भर्ता

नादानशिक्षां यथोचिताम् किंचैते प्रवराः सप्त कीलकैरतियंत्रिताः कदाचिदपि नोद्धाट्या

स्त्वया वेदेहिनं हिति एवमस्त्विति वैश्रोक्ता निजकर्मचकारह ततोऽन्यत्काले धमाग्रे वांधवैः

प्रीतिपूर्वकं तावदेवहि भोक्तव्यं यावत्ताकथ्यते कथा कदाचिद्याकुली भूत्वा धर्मराजवि

देहगा उत्पाटयित्वा प्रवरं ददर्श जननीं स्वकाम् पच्यमानां चरुदंतीं भीषणैर्यमकिंकरैः

लीलया सिच्यमानेव धातस्तप्ततैले षु सा पुनः तथैव तालकं वद्धा पीडितामामनाश्विनी द्विती

ये प्रवरे तद्वत्तामेव चरदर्शह तत्रनिष्पीड्यमाना सा शिलायां लोष्टकेन च तृतीये प्रवरे

तद्वत्तां ददर्श स्वमातरम् करकैः पीड्यमानां तु घोरायुक्ते रकल्पितैः चभिन्ना तु चर्तुर्थे प्रवरेऽभी

यणौर्दारुणाननैः भ्रमहृत्य नसत्तणा घेम्मकेंदती तांपुनःपुनः पंचमे प्रवरे भस्मोकं वेपादेन

ताडिताम् सदंशैर्घोनपातेस्माछिद्यमानां सहस्रशः षष्ठे तामपि ड यंत्रस्या मस्तके मुद्गराहतां

श्र.कं.
१२१

संपीड्यमानामनिशंमुग्ध्रशोदारुखंडवत् सप्तमेप्रवरेचैवकृमिरूपैःसुदारुणैः रक्षितया
गतांतांतुमातरंदुःखकर्शिताम् श्यामलाम्लानवदनाकिंचिन्नोवाचभामिनी अथ्यागतोथ
मंप्राहसरोषोश्यामलामिति किमर्थंम्लानवदनातिष्टसित्वमनिंदिते कारणंतत्रमेब्रू
हिकिंचिन्नोद्घाटितात्वया एतेप्रवरकाःसप्तनिषिद्धायेपुरामया रत्नकाश्यामलाप्राहभ
र्तारंविनयान्विता किंनुपापंकृतंराजन्ममभ्रात्रासुदारुणं येनेत्थंविविधैर्घोरैर्वीध्य
तेवहुशस्त्वया रत्नकःप्रिययाप्राहतांयमःप्रहसन्निव तवभ्रात्रासुतस्नेहाक्रोधमाये
हृताःकिल किंनजानासितज्जड्येनदृष्टासिमामिह त्रयस्त्वंगणयाद्यकं दहत्यासप्तमंकु
लं तदेवक्रिमिरूपेणक्लिश्यत्यासप्तमंकुले गोधूमास्तद्रुमेभूत्वा कृमिरूपांसुदारुणाः
येपुराब्राह्मणगृहेहृतास्तेत्वत्कृतेतया जानाम्येतदहंसर्वंयन्नेमात्राकृतंपुरा श्यामलो
वाच तथापितांसमासाद्यदेवमातरंविभुं मुच्यतेतेनपापेनयथात्वमधुनाकुरु तद्ब्रू

त्वाधिं तया विष्टः चिरं ध्यात्वा जगाद तौ॥ धर्मराजः सुखासीनः प्रियो ब्राह्मणसत्तमौ इतस्त्वं स
प्तमे तीते जन्मनि ब्राह्मणी शुभा आसीत्तस्मिंस्तदा संगात् सखीनां पर्युपोषिता बुधाष्टमी शुभ
पूर्णा यथोक्तफलदायिनी तस्याः पुण्यप्रदस्त्वं यदि संस्मरागतः तेन मुक्ते न नरकात्ते मा
ता पापसंघवर्जित नघूत्वा त्वरितं स्नात्वा दत्तं पुण्यं त्रिवाचकं स्वमातुः श्यामला तुष्टा तेन मोक्षं
जगाम सा ऊर्मिला रूपसंपन्ना दिव्यदेहा वराभूषा विमानवरमारूढा दिव्यमाल्यांबरान्विता
भर्तुः समीपे स्वर्गस्था दृश्यते याऽपि साजनैः बुधस्य पार्श्वे नभसि निमिराजसमीपगा वि
स्फुरंती महाराज बुधाष्टम्याः प्रभावतः युधिष्ठिर उवाच यद्येवं प्रवरा कृष्ण तिथिर्वै तु बुधा
ष्टमी तस्यास्त्वेव विधिं ब्रूहि यादृशोऽसि माधव कृष्ण उवाच शृणु पांडव यत्नेन बुधाष्ट
म्या विधिमुत्तमं यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि तदा तदा हि सा ग्राह्या एकभक्ताशनैः
नदिः स्नात्वा नद्यां तु पूर्वाह्णे गृहीत्वा करकं नवं जलपूर्णं समद्भूतं कृत्वा नद्यैः समन्वितम्
स्तं:

पूजयित्वा गृहे नीत्वा बुधमेवं क्रमेण तु माषकेन सुवर्णेन तदर्द्धार्द्धेन वा पुनः कारयेद्बुधरू
पं तु स्वशक्त्या वा प्रयत्नतः अंगुष्ठमात्रं पुरुषं चतुर्बाहुं सुलक्षणं पद्ममध्ये व्रणं कुंभं पूरयेत्
सिततंदुलैः हेमपात्रेण संछाद्य पीतवस्त्रयुगेन च वस्त्रोपरिस्थितं देवं पीतवस्त्राक्षता
दिभिः पंचामृतेन संस्नाप्य तत्तन्मंत्रैः क्रमेण तु नैवेद्यं गुग्गुलं धूपं दशांगेन सुगंधकं पाय
सैर्घृतपूरैश्च मोदकाशोकवर्त्तकैः फलैश्चाविविधैश्चैव शर्करामिश्रितैः शुभैः ततः पुष्पाक्ष
तैः पीतैः वक्ष्यमाणैश्च नामभिः नमो बुधाय ययादेतु सोमपुत्राय ज्ञानिनी तारकेय कटिं वै
वराजपुत्राय चोदरं इलाप्रियाय हृदयं कुमारायेति वक्षसि वहू पुरूरवः पित्रे ग्रीवां सोमसोन
सुताय च मुखं तु पीतवर्णाय ज्ञानाय नयनद्वयं मूर्द्धानं च बुधायेति एषु स्थानेषु पूजयेत्
सौवर्णे राजते ताम्रे पात्रमादाय शोभने गंधपुष्पाक्षतैः पीतैः गुडमिश्रांबु पूरितैः जानुभ्या
मवनीं गत्वा तेन चार्घ्यं निवेदयेत् उर्वश्यां स्वसुतो यस्तु यः पुरूरवसः पिता योग्रहाणाम्

70

घिपतिर्बुधो नः संप्रसीदत्वेवं राजन्विधानादत्वा सकलान्नः प्रणम्य तु मंत्रेणानेन दत्वार्घ्यं
जत्वामंत्रमिमं पुनः प्रथमे मोदकान्दद्यात् द्वितीये फेणिकांस्तथा तृतीये घृतपूरांश्च चतु
र्थे वटपत्रिकान पंचमे शुभ्रकारां षष्ठे सोहालिकांस्तथा अशोकवर्त्तिकाश्चैव सप्तमे
कार्यमेव च अष्टमे शर्करामिश्रैः खाण्डवैश्च युधिष्ठिर प्रियाय वायनं दद्यात् व्रती भोज
नमाचरेत् एवं क्रमेण कर्त्तव्यं तु धात्र्यष्टम्यां युधिष्ठिर बांधवैः सह मित्रैश्च भोक्तव्यं प्रीति
पूर्वकम् सौम्यमाप्नोपनेश्रृएवन्न नरकेभ्यो विमुंचति सोमात्मजात्सकमशेषसुखप्रदं
यं संपूजयेत्सकलनीरयुतं च कुंभे पक्कान्नपात्रसहितं सहिरण्यवस्त्रं पश्यत्स सोयमपुरी
न कदाचिद्देव इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे बुधाष्टमीव्रतं नाम अथोद्या
पनं युधिष्ठिर उवाच उद्यापनविधिं ब्रूहि कृपया भक्तवत्सल कस्मिन्काले च किं द्रव्यं कथं
सफलभाक् भवेत् श्रीकृष्ण उवाच आदौ मध्ये तथा चांते कुर्यादुद्यापनक्रियां सप्तमां ब

71

यतोमर्त्यः कुर्याद्दंतधावनम् आचम्य कुर्यात्संकल्पं दशविप्रान्निमंत्रयेत् सप्तम्यां प्रातरुत्था
य शुचिर्भूत्वा व्रती ततः गंगायादिमहातीर्थे स्नात्वा नित्यकृतक्रियः गृहमध्ये शुचौदेशे रंगवल्ली
विराजिते पुण्याहवाचनं कृत्वा कुर्याद्दिक्षाविधानकं प्राणानायम्य विधिवत्कृत्वा संकल्पनादि
कं तिथ्यादि ल्लेखनांते च व्रतनाम प्रकीर्त्तयेत् मयाकृतं वुधाष्टम्याव्रतं सांगफलाप्तये उद्याप
नं करिष्ये इति स्पष्टं साक्षतकुशोदकं सत्काचार्यादिवरणं कुर्याद्वस्त्रादिभिः फलैः ब्राह्मणवरण
यात्तत्र वस्त्रतांबूल भूषणैः ततः पूजादिकं कुर्यात् गृहयज्ञपरःसरं ततस्त्वष्टदलं कुर्यान्म
ध्ये कर्णिकया सह पंचवर्णैः समापूर्य दलाग्राणि च केसरान् कर्णिकायां न्यसेद्धान्यं पंचप्र
स्थप्रमाणतः दलेषु च दलाग्रेषु यथाशक्त्या विनिक्षिपेत् तत्रैव स्थापयेत्कुंभान् मध्ये पूर्वादि
दिक्षु च गंगाजलेन संपूर्णान् वस्त्रादिभिरलंकृतान् पंचत्वक्पल्लवोपेतान्नव कुंभान् यथाविधि
तदुत्तरे ग्रहान् सर्वान् मंडले स्थापयेत्ततः तस्यैव स्थापयेत्कुंभं वारुणं चाविशेषतः वस्त्रे वैक

स्यां राज्ञस्य वैश्यस्य त्वां वा ग्रामाय हारं कन्याद्रूपं वा कृत्वा ग्रामात् प्राचीं वा दिशमुपनिष्क्रम्य प्रभूतेने
धनेनाग्निं प्रज्वाल्य गायत्र्या नवग्रा हुतिभिः आहुतिसहस्रं जुहुयात् गायत्र्या अष्टसहस्रमावर्त्य ग्रा
ग्र३४ दितिं प्रोक्षमाणः तस्मिन् हिरण्यवर्णाभि रात्मानं प्रोक्षयित्वा वामदेव्यं त्रिरावर्त्य तद्देतुस्मात् स्नातो
भवति अत्र च सर्वत्राविशेषितव्याहृतिशब्देन भूर्भुवः स्वरितिति स्रो व्याहृतय उच्यन्ते तत्र
स्वगृह्योक्तकुशकण्डिकाविधानेन परिसमूहनादिपर्युक्षणान्तं कृत्वा आघारादिप्राजापत्यां
न्तं कृत्वा व्याहृतित्रयस्य प्रजापतिऋषिः अग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप् छन्दांसि त्र
नाम्नात प्रायश्चित्ते प्राणायामे विनियोगः ओं भूर्भुवः स्वरिति प्रथममन्त्रो दशवत्तो दृशं ओं भूर्भुवः
स्वः स्वाहा एवं क्रमेणाहुतिसहस्रं कृत्वा स्विष्टकृद्धोमं समापयेत् ततोऽधिकसहस्रं गा
यत्रीं जपित्वा च तस्मिन् हिरण्यवर्णाभिरिति ओं हिरण्यवर्णाः शुचयः पावका यासु जातः
कश्यपो यास्विन्द्रः या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योना भवन्तु यासां देवा दिवि
कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योना
भवन्तु शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे घृतश्चुतः शुचयो याः पा
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्यो
नाभवन्तु ४३

कृत्वा ४

शिव. २८

विश्वं भवनसप्तकं सर्वेषु चैव लोकेषु कामचारः स जायते एषा लोकवती नेयात्तनुरायाप्रजाप
तेः बौधायनः प्रायश्चित्तानि वक्ष्यामि विस्तरेणानि विशेषतः समाहितानां युक्तानां प्रमादेषु क
थं भवेत् ॐ पूर्वाभिर्व्याहृतिभिः सर्वाभिः सर्वपातकेष्वाचामेत् यत्प्रथमम् आचामति तेन ऋग्वे
दं प्रीणाति यद्द्वितीयं तेन यजुर्वेदं यत्तृतीयं तेन सामवेदं यत्प्रथमम् अभ्युक्षति तेनाथर्ववेदं यद्द्वि
तीयं तेनेतिहासपुराणादीनि यत्सव्यं पाणिं प्रोक्षति पादौ शिरो हृदयं चक्षुः कर्णौ नासिका ना
भिं चोपस्पृशति तेनौषधिवनस्पतयः सर्वाश्च देवतान् प्रीणाति ग्राम्णोति च तस्मादाचमना
देव सर्वस्मात् पापात्मुक्तो भवति उपपातकानुवृत्तौ यमः ओंकाराद्या व्याहृतयः सहस्रम् अनुम
न्त्रिताः फलाहारस्तु मासेन तदपैव विमुच्यतीति ओंकारयुक्ताः ... व्याहृतयः ॐ भूर्भुवः
स्वरिति सहस्रम् अनुमन्त्रिताः सहस्रजपितान् ... जपित्वा सहस्रं त्र्यब्दं जपित्वा स्वर्थं
ततः फलाहारस्तु एनं तदपैव विमुक्तो भवति वसिष्ठः मनसा पापं ध्यात्वा ॐ पूर्वाः सप्त
व्याहृतीर्जपेत् शातातपः अनुदकमूत्रपुरीषकरणे ... स्पर्शे सचैलस्नानं महाव्याह
तिभिश्चरेत् महाव्याहृतिभिरिति भूर्भुवः स्वरिति तिसृभिरित्यर्थः वृद्धयमः गोहत्या ब्रीह

गायत्रीयो न जानाति वृथा तस्य परिश्रमः । पश्य पश्य गायत्री चैव वेदांश्च तुलया समतोलयत् वेदा
एकत्र सांगास्तु गायत्री एकतः स्मृता योधीते नार्थतत्वज्ञः तस्य तत्कारणं वृथा भारवाहीव भ
तकः केवलं क्लेशभाग्भवेत् तथा ज्ञानं कर्म च संयुक्तं सत्कार्यं कथितं मया अधीतं श्रुतं संयु
क्तं तत्पापाश्रेष्टं तु केवलं स्यात्खरवद्भारवाही किं तद्धीत्य वेदं न विवेद चार्थं योर्थवित्सकलं भद्रम
श्नुते नाकमेति विधूतपाप्मा सवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः सुरापश्च विशुध्यति
तज्जप्यान्न संशयः तथा सुता देवी विशेषेण सर्वकल्मषनाशिनी सर्वकामप्रदा देवी वर
दा भक्तवत्सला घृतयुक्तैस्तिलैर्वह्निं हुत्वा तु सुसमाहितः गायत्र्या प्रयतः शुक्लो सर्वपापैः प्र
मुच्यते पापात्मा लक्षहोमेन पातकेभ्यः प्रमुच्यते अभीष्टं लोकमाप्नोति तथा पापविवर्जि
तः गायत्री वेदजननी गायत्री पापनाशिनी गायत्र्यास्तु परं नास्ति पावनं दिवि चेह च हस्तत्रा
णप्रदा देवी पततां नरकार्णवे तस्मात्तामभ्यसेन्नित्यं ब्राह्मणो हृदये शुचिः गायत्रीजप्यनिर
तं हव्यकव्येषु भोजयेत् तस्मिन्न तिष्ठते पापमब्बिंदुरिव पुष्करे शंखः अशीतिस्तनुवत्तेन व्याहृ
तिभ्यः परं होमे योगी याज्ञवल्क्यः एतास्तु व्याहृतीः सप्रणवः समेत्य प्राणसंयमे उपासितं भवेत्तेन

75

शिव.
२२

इत्याक्षरकं ब्रह्मगायत्री सशिरा तथा सकृदावर्त्तयेद्यस्तु सर्वपापैः प्रमुच्यते एवं यस्तु विजानाति गा
यत्रीं ब्राह्मणस्तु सः अन्यथा शूद्रधर्म्मा स्याद्वेदानामपि पारगः तस्मात्सर्वप्रयत्नेन ज्ञात्वा ब्रा
ह्मणेन सा व्याहृत्योंकारसंहिता सशिरस्का यथार्थतः सशिराश्चैव गायत्री यैर्विप्रैरवधारिता
ते जन्मबंधनिर्म्मुक्ताः परंब्रह्म विदंति च अग्निपुराणे सव्याहृतिं सप्रणवां गायत्रीं शिरसा स
ह ये जपंति सदा तेषां न भयं विद्यते क्वचित् योगियाज्ञवल्क्यः आद्या व्याहृतयः सप्त गाय
त्री सशिरा तथा ॐकारं विंदते यस्तु स मुनिर्नेतरो जनः शंखः सव्याहृतिं सप्रणवां गाय
त्रीं शिरसा सह ये जपंति सदा तेषां न भयं विद्यते क्वचित् शतजप्ता तु सा देवी दिनपापप्र
णाशिनी सहस्रजप्ता तु तथा पातकेभ्यः प्रमोचनी दशसाहस्रजप्येन सर्वकल्मषना
शिनी लक्षजप्ता तु सा देवी महापातकनाशिनी स्वर एकाक्षर ओंकार ऋग्वेदे स्वरितो
दे दात्त एकारो यजुर्वेदे स्वरितोदात्त एकाक्षरं साम्नि संक्षिप्तोदात्त एकाक्षरं अथर्ववेदे उ
दात्तो नात्र संशयः यथा हि प्रबलो वह्निः कक्षं दहति सानिलः तथा कालाग्निरुद्रोसौ
लोकान् दहति चांतकः इति वचनमासाद्य वेदाः सांगास्तु चत्वारो धीताः सर्वं च यामया

तीर्थंचनसंभार्हैः स्तपवर्णाभिः प्राणायामंकृत्वाग्रासानेवप्रज्ञास्यनस्नानापात्पूतोभवति इतिप्राणा
याममाहात्म्यं अथसप्रणवसव्याहृतिसशिरस्कगायत्रीजपफलं तत्रविष्णुधर्मोत्तरीयप्र
थमकांडे सव्याहृतीकप्रणवाजप्यव्याशिरसासह प्रणवेनतथाव्यस्ताभ्यांवाव्याहृतयःपृथक्
तथासव्याहृतिंसप्रणवांगायत्रीशिरसासह येजपंतिसदातेषांनभयंविद्यतेक्वचित् दशकृ
त्वःप्रजप्तासारात्र्याह्नायत्कृतंलघु तत्पापंप्रणुदत्याशुनात्रकार्याविचारणा शतजप्तातु
सादेवीपापोपशमनीस्मृता सहस्रजप्तासादेवीउपपातकनाशिनी लक्षजप्येनचतथा
महापातकनाशिनी कोटिजप्येनराजेंद्रयदिच्छतितदाप्नुयात् यक्षविद्याधरत्वंवागंधर्व
त्वमथापिवा देवत्वमथवाराज्यंभूर्लोकेहतकंटकं दशसाहस्रजप्येननिःकामंपुरुषोत्तमः
विधिनाराजशार्दूलप्राप्नोतिपरमंपदं यथाकथंचिज्जप्तैषादेवीपरमपावनी सर्वकाम
प्रदाप्रोक्ताविधिनाकिंपुनर्नृप अथअर्थंगाः सर्वात्मनाहियादेवीसर्वभूतेषुसंस्थिता गा
यत्रीमोक्षसेतुर्वैमोक्षस्थानमलक्षणं ओरुशाक्षरकंब्रह्मगायत्रीसशिरास्मृता त्रिपिपाद
मधीयीतगायत्रीशिरसातथा सर्वपापैःप्रमुच्यंतेब्रह्मपर्यंतैःसप्ता योगियाज्ञवल्क्यः श्रो

त

शिवः

प्रायं ४१

४०

प्राणायामान् विष्णुर्ध्यर्थं नेयांस्तान्त्वा सदाचरेत् । व्रत्यमः चांडालीवृषकशीमित्रकलत्रं वागत्वा उप
स्पृश्य वामदेव्येन त्रीन् प्राणायामान् कृत्वे तस्मात्सूत्तो भवति । अत्र वामदेव्येन त्रीन् प्राणाया
मान् कृत्वेति पूरककुंभकरेचकेषु प्रत्येकं पवित्रे वारत्रयेण एकः प्राणायामः एवं क्रमेणान
व वारानुपगित्वा प्राणायामत्रयं करणीयमित्यर्थः । तथा रेतो मूत्रपुरीषप्राशनं कृत्वा लसुन
पलांडु गृंजनकं कुकाटी नामस्मेषां चाभक्षणेभक्षणे हंसग्रामकुक्कुटश्रृगालमांसभक्षणे कृ
त्वा कृत्वा मात्रमुदकमवतीर्य शुद्धवतीभिः प्राणायामं कृत्वा महाव्याहृतिभिः उरोगमुदकं पीत्वा
तदेव तस्मात्पापात्सूत्तो भवति । अत्र शुद्धवतीभिः प्राणायामं कृत्वेति पूरककुंभकरेचकक्रमे
ण शुद्धवतीनामकं मंत्रत्रयं पठनीयमित्यर्थः । शुद्धवती मंत्रस्य एतदं तत्र ऋषिः अनुष्टुप् छंदः इंद्रो
देवता मार्जने विनियोगः । मंत्रो यथा ओं एतोन्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना शुद्धैरुक्थैर्वावृधांसं
शुद्ध आशीर्वान् ममत्तु इंद्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः शुद्धो रयिं निधारय शुद्धो
ममद्धि सोम्यः शुद्धो रत्नानि दाशुषे शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि । तथा रहस्येच रह
स्मनः ब्राह्मणोष्युस्त्रवणैष्ठेयं कृत्वाशिरःपेशलायां प्रविश्य अप्सु निमज्य अघ्नीवामात्रमुदकमव

भी ५१

सूकर ५४

इत्ता-

प्राणायामेः ४

मासान्पुनंत्यहरहः कृत्वा: विष्णुधर्म्मोत्तरार्गेन्पुराणमनुयोगियाज्ञवल्क्यव्यासापस्तंबा: स
प्याहर्ता. कप्राणवाप्राणायामास्तषोडश अपिभ्रूणहनंमासात्पुनंत्यहरहः कृत्ता: वसिष्ठस्मृतौ सवृती

प्रमहं ३४ मासांषोडशप्राणायामान्कृत्वाएककालेहविष्याशीमासेनब्रह्महापूतोभवति कर्म्मोनेययाश्चिनी
दद्यात् ब्जापस्तंब: अष्टगालवैरेर्द्देशोग्राम्यै: क्रव्यादभिरेवच नराश्वोष्ट्रवराहैश्च प्राणायामे
नशुध्यति उष्ट्रयानंसमारुह्यखरयानंचकामतः स्नात्वातुविप्रोदिग्वासा: प्राणायामेनशुध्यति
कात्यायनः प्राणायामैश्चदुर्गंधे विष्ठघ्नीतिशेषः सुमंतुः मद्यानवत्तोगंधाघ्राणेप्राणायाम एकः
गद्यव्यास: गंधघ्राणेसुरायाः प्राणायामोघृतप्राशनंच कूर्म्मपुराणं सुरांस्पृष्ट्वाद्विजः कुर्यात्प्राणा
यामत्रयंशुचिः पाराशरः शातातपश्च अज्ञानभुक्तमत्तनक्षात्रानुवृत्तो ब्राह्मणस्ययदाभुंक्तेप्राणा
यामेनशुध्यति पराशरः ब्राह्मणान्नंद्विजोभुक्त्वाकृत्वाकर्म्मविगर्हितं प्राजापत्येनशुध्येत प्राणा
यामैस्तुषोडशैः कूर्म्मपुराणे अनस्थांचैवहिंसायां प्राणायामेनशुध्यति मनुयोगियाज्ञवल्क्यौ
अह्नारात्र्याचयानजंतून्हिंसत्यज्ञानतोयदि तेषांस्नात्वाविशुध्यर्थंप्राणायामान्षडाचरेत् र
हस्येवश्यम: प्राणायाम:परंतप: पद्मायतिधर्म्मे मनिरज्ञानतोजंतून्हिंसन्नित्यंदिवानिशं

79

शिव:
२५

मर्द्भमासं४ पतनीय

षु यथाल्पदर्पेवंयुक्तैर्द्वादशप्राणायामान् धारयेत् पातकपतनीयोपपातकवर्ज्येषु यथा
ल्पदर्पेवंयुक्तं द्वादशाख्यान् द्वादशद्वादशप्राणायामान् धारयेत् पातकवर्जेषु यथाल्पदर्पेवंयु
क्तं द्वादशाख्यान् द्वादशद्वादशप्राणायामान् धारयेत् पातकवर्जेषु यथाल्पदर्पेवंयुक्तं द्विमा
सं मू द्वादशद्वादशप्राणायामान् धारयेत् अथ पातकेषु संवत्सरं द्वादशप्राणायामान् धा
रयेत् योगियाज्ञवल्क्यः त्रिरात्रंत्रिगुणं कृत्वा नियतात्माजितेंद्रियः प्राणायामैश्चतुर्भिस्तु
मुच्यन्तेह्युपपातकात् प्राणायामशतं कार्यं सर्वपापापनुत्तये उपपातकयुक्तानामनादि
ष्टस्य महते तथा ब्रह्महा च सुरापश्च गम्यागामी तथैव च सुवर्णस्तेयचौरश्च गोघ्नो विश्वस्त ली
भघातकः शरणागतघाती च कूटसाक्षी त्वकार्यकृत् एवमादिषु चान्येषु पापेषु विरतास्थि
रं प्राणायामशतं कृत्वा सूर्यस्योदयनं प्रति निर्मलाः स्वर्गमायांति संतः सुकृतिनो यथा वि
ष्णुधर्मोत्तरादिपुराणयोः आवर्णयोर्गिमासांश्च सोपवासो जितेंद्रियः प्राणायामशतं
कृत्वा मुच्यते सर्वकिल्बिषैः अत्रिवासिष्ठौ च प्राणायामैर्य आत्मानं नियम्यास्तेयुनः पुनः दश
द्वादशभिर्वापि चतुर्विंशात्परं तपः सव्याहृतिं कप्रणवाः प्राणायामास्तु षोडश अपि भ्रूणहनं

मुच्यते सर्वकिल्बिषैः प्राणायामशतं कृत्वा।४